श्वेत् । त्रिङ्गिका ४ बालमूषिका ५ । नेङ्टे इदुँर इति भाषा । इत्यमरः ॥ मूषकः ६ मूषः ७ मूषीकः ८ उन्दूरुः ९ खनकः १० वभ्रुः ११ वृषः १२ आखनिकः १३ वृषः १४ दीना १५ मुषीका १६ । मूषा १७ मूषीका १८ मूषिका १९ । इति शब्दरत्नावली ॥ विलेशयः २० सुषिरः २१ इन्दूरः २२ । इति जटाधरः ॥ चुन्दस्य तस्य पर्य्यायः । चिकाः २३ वेश्मनकुलः २४ चिका २५ । इति च शब्दरत्नावली ॥ छालाङ्गला २६ आक्षनिका २७ । इति जटाधरः ॥

उन्दूरुः, पुं, (उन्द + बाहुलकात् ऊरुः ।) मूषिकः । इति हेमचन्द्रः ॥
("उन्दूरुखाम्बरङ्कितं तेन वातघ्नकल्कवत्" ॥
इति वाभटे चिकित्सास्थाने ८ मेऽध्याये ॥)

उन्दूरुकर्णी, स्त्री, (उन्दूरोः मूषिकस्य कर्णाइव पर्णमस्याः । उन्दूरुकर्ण + ङीष् ।) आखुकर्णी लता । इति राजनिर्घण्टः ॥

उन्नः, त्रि, (उन्द + क्त । नुदविदेति पक्षे नत्वम् ।) क्लिन्नः । दयापरः । इति हेमचन्द्रः ॥

उन्नतः, त्रि, (उत् + नम + क्त ।) वर्द्धितः । तत्पर्य्यायः । उच्चः २ प्रांशुः ३ उदग्रः ४ उच्छ्रितः ५ उत्तुङ्गः ६ । इत्यमरः ॥ उच्चैः ७ । इति शब्दरत्नावली ॥ तुङ्गः ८ । इति जटाधरः ॥ (यथा, रघुः । १ । १५ । "स्थितः सर्व्वोन्नतेनोर्व्वीं क्रान्त्वा मेरुरिवात्मना" ॥ स्त्री, दिनपरिमाणज्ञानसाधनं उपायः । यथा सिद्धान्तशिरोमणौ । "दिवसस्य यद्गतं यच्च शेषं तयोर्यदल्पं तदुन्नतसंज्ञं ज्ञेयम्" । (पुं, चाक्षुषमन्वन्तरे ऋषिभेदः । यथा, मार्कण्डेये ७६।५४।
"सुमेधा विरजाश्चैव हविष्मानुन्नतो मधुः ।
अतिनामा सहिष्णुश्च सप्तासन्निति चर्षयः" ॥)

उन्नतनाभिः, त्रि, (उन्नतो नाभिः यस्य ।) उच्चनाभियुक्तः । तत्पर्य्यायः । तुन्दिः २ । इति हलायुधः ॥

उन्नतानतं, त्रि, (उन्नतञ्च तत् आनतञ्चेति ।) उच्चनीचस्थानादि । तत्पर्य्यायः । बन्धुरम् २ । इत्यमरः ॥

उन्नतिः, स्त्री, (उत् + नम + क्तिन् ।) गरुड़भार्य्या । समृद्धिः । ("वक्षोजौ करिकुम्भविभ्रमकरीमत्युन्नतिं गच्छतः" । इति साहित्यदर्पणे ॥ ३ य परिच्छेदे ।) उदयः । इति हेमचन्द्रः ॥ (यथा, सिद्धान्तशिरोमणौ ।
"मासान्तपादे प्रथमेऽथवेन्दोः
शृङ्गोन्नतिर्यद्दिवसेऽवगम्या ।
तदोदयास्ते निशि वा प्रसाध्याः
शृङ्गविधोः खोदितनाड़िकाद्यैः" ॥)

उन्नतीशः, पुं, (उन्नत्याख्यदाख्यया प्रसिद्धाया गरुड़पत्न्याः ईशः स्वामी ।) गरुड़पक्षी । इति त्रिकाण्डशेषः ॥

उन्नमितः, त्रि, (उत् + नम् + णिच् + क्त ।) उत्तोलितः । उर्द्ध्वीकृतः । इति श्रीधरस्वामी ॥
("अथ प्रयत्नोन्नमितानमत्फणै-
र्धृते कथञ्चित् फणिनां गणैरधः" ॥
इति माघे । १ । १४ ॥)

उन्नयः, पुं, (उन्नयनम् । उत् + नी + अच् विदपवाद विषयेऽप्युत्सर्गोऽभिनिविशते इति एरच् ।) ऊर्द्ध्वनयनम् । इत्यमरः ॥

उन्नयनं, क्ली, (उत् + नी + ल्युट् ।) वितर्कः । इति हेमचन्द्रः ॥ ऊर्द्ध्वप्रापणम् । उत्तोलनम् । तोलन उठान इत्यादि भाषा ॥
(यथा, कात्यायने । २२ । १० । ५ ॥
"तेष्वेवोन्नयनमप्यभि सोमानुन्नयन्तीति श्रुतेः," ।
उदूर्द्ध्वे नयनं यस्येति वाक्ये वाच्यलिङ्गः" ॥)

उन्नायः, पुं, (उन्नयनं इति । उत् + नी + घञ् ।) उन्नयनम् । इत्यमरः ॥ (यथा भट्टिः । ७ । ३७ ।
"उन्नायानधिगच्छन्तः प्रज्ञावैर्वसुधाभृताम्" ॥)

उन्नाहं, क्ली, (उत् + नह + घञ् ।) काञ्जिकम् । इति हेमचन्द्रः ॥

उन्निद्रः, त्रि, (उद्गता निद्रा स्वप्नो दुःखादिकं वा यस्मात् ।) प्रफुल्लः । विकसितः । इति हेमचन्द्रः ॥
("उन्निद्रपुष्पचनचम्पकपुष्पभासाः" ।
इति माघः । प्रबुद्धः । शयनादुत्थितः ।
"तामुन्निद्रामवनिशयनां सौधवातायनस्थाः" ।
इति मेघदूते । ८८ । तथा, शकुन्तले मत्क्षाङ्के ।
"शय्याप्रान्तविवर्त्तनैर्विगमयत्युन्निद्र एव क्षपाः" ॥)

उन्भ प श पूर्त्तौ । (तुदां + पर + सकं + सेट् ।) कुरुकादिः । प श उम्भति कुम्भं जलेन लोकः । उम्भामास । इति दुर्गादासः ॥

उन्मत्तः, त्रि, (उत् + मद + क्त ।) उन्मादयुक्तः । वायुहतचित्तविभ्रमविशिष्टः । पागल इति भाषा । तत्पर्य्यायः । उन्मादवान् २ । इत्यमरः ॥ तस्यौषधम्, यथा,—गारुड़े १९९ अध्यायः ॥ * ॥
"कूर्म्ममत्स्याखुमहिषगोऽजगालाश्च वानराः ।
विड़ालवर्हिकाकाश्च वराहोलूककुक्कुटाः ॥
हंस एषाञ्च विण्मूत्रं मांसं वा रोमशोणितम् ।
धूमं दद्याज्ज्वरार्त्तस्य उन्मत्तेभ्यश्च शान्तये ॥
एतान्यौषधजातानि धूपितानि महेश्वर ।
निघ्नन्ति ज्वरमुन्मादं वृक्षमिन्द्राशनिर्यथा" ॥
("तमात्मनो हतमुपलभ्यन्तो देवादयः कुर्व्वन्त्युन्मत्तम्" । इति निदानस्थाने सप्तमेऽध्याये ।
"देवर्षिपितृगन्धर्व्वैरुन्मत्तस्य च बुद्धिमान् ।
वर्ज्जयेदञ्जनादीनि तीक्ष्णानि क्रूरकर्म्म च ॥
सर्पिष्पानादि तस्येह मृदुभैषज्यमाचरेत्" ॥
इति च चिकित्सास्थाने १४ अध्याये चरकेणोक्तम् ॥
अन्यद्विवरणमस्योन्मादशब्दे ज्ञेयम् ॥)
तद्वाक्यप्रामाण्यं यथा,—मलमासतत्त्वे ॥
"उन्मत्तानाञ्च या गाथा शिशूनां चेष्टितं च यत् ।
स्त्रियो यच्च प्रभाषन्ते नास्ति तत्र व्यतिक्रमः ॥
आदौ गच्छति देवेषु पश्चात् गच्छति मानुषान् ।
नादेशिता वाग्वदति सत्या ह्येषा सरस्वती" ॥

उन्मत्तः, पुं, (उन्मत्तयति । उन्मत्त + तत्करोतीति णिच् + पचाद्यच् ।) धुस्तूरः । यथा,—
("श्वेतोन्मत्तस्योत्तरदिङ्मूलसिद्धस्तु पायसः ।
गुड़ाज्यसंयुतो हन्ति सर्व्वोन्मादांश्च दोषजान्" ॥
इति वैद्यकचक्रपाणिसंग्रहे उन्मादाधिकारे ॥)
मुचुकुन्दवृक्षः । इति मेदिनी ॥

उन्मदः, त्रि, (उद्गतो मदो यस्य ।) उन्मादयुक्तः । उद्धतमदः । तत्पर्य्यायः । उन्मदिष्णुः २ । इत्यमरः ॥ ("उदीरयामासुरिवोन्मदानाम्" ॥ इति रघुः । २ । ९ । तथा, माघे ६ । २९ ॥
"मधुकराङ्गनया मुहुरुन्मद-
ध्वनिभृता निभृताक्षरमुज्जगे" ॥)

उन्मदिष्णुः, त्रि, (उत् + मद + इष्णुच् ।) उन्मदः । उन्मादशीलः । इत्यमरः ॥

उन्मनाः, [स्] त्रि, (उद्गतं उत्कण्ठितं मनो यस्य ।) उत्कण्ठितचित्तः । तत्पर्य्यायः । उत्कः २ । इत्यमरः ॥
("उन्मनाः प्रथमजन्मचेष्टिता-
न्यस्मरन्नपि बभूव राघवः" ।
इति रघुः । ११ । २२ । "पयोधरेणोरसि काचिदुन्मनाः" ॥ इति किराते । ८ । १९ ॥)

उन्मन्थः, पुं, (उत् + मथि + घञ् ।) मारणम् । वधः । इति हेमचन्द्रः ॥

उन्माथः, पुं, (उन्मथ्यतेऽनेनेति । उत् + मथ + घञ् । मारणादिपक्षे भावे घञ् ।) कूटयन्त्रम् । मृगवधोपयुक्तयन्त्रम् । आमिषं दत्त्वा मृगपक्षिबन्धनार्थं यत् सन्धानयन्त्रं निवेश्यते सः । इत्यमरः ॥ मारणम् । घातकः । इति मेदिनी ॥
(यथा, प्रबोधचन्द्रोदये ।
"प्रभो महायानां क इव भुवनोन्माथविधिषु" ॥)

उन्मादः, पुं, (उत् + मद + घञ् । (महादेवः । यथा महाभारते । महादेवसहस्रनामकथने १३ । १७ । ९९ ॥ "उन्मादो मदनः कामो ह्यश्वत्थोऽर्थकरो यशः" ।) वातिकरोगविशेषः । तत्पर्य्यायः । चित्तविभ्रमः २ । इत्यमरः ॥ मतिभ्रंशः ३ उन्मनाः ४ । इति राजनिर्घण्टः ॥ (चित्तविप्लवः ५२ । २३४ । इति हेमचन्द्रः ॥) मानसरोगविशेषः ।
तस्यौषधं यथा,—
"वचा त्रिकटुकञ्चैव करञ्जं देवदारु च ।
मञ्जिष्ठा त्रिफला श्वेता शिरीषो रजनीद्वयम् ॥
प्रियङ्गुनिम्बत्रिकटु गोमूत्रेणावघर्षितम् ।
नस्यमालेपनञ्चैव स्नानमुद्वर्त्तनम् तथा ॥
अपस्मारविषोन्मादशोषालक्ष्मीज्वरापहम् ।
भूतेभ्यश्च भयं हन्ति राजद्वारे च शासनम्" ॥
इति गारुड़े १९९ अध्यायः ॥ * ॥ अथ उन्मादाधिकारः ॥ तत्र उन्मादस्य निरुक्तिमाह ।
"मदयन्त्युद्धता दोषा यस्मादुन्मार्गमाश्रिताः ।
मानसोऽयमतो व्याधिरुन्माद इति कीर्त्तितः" ॥
अयमर्थः । यस्माद्धेतोरुद्धताः प्रवृद्धा दोषाः उन्मार्गमाश्रिताः मदयन्ति चित्तं विक्षिपन्त्यस्मिन् । अतोऽयमुन्माद इति कीर्त्तितः । सः उन्मादः मानसो व्याधिः मनोवैकल्यकरत्वात् ॥ * ॥ तस्यैवावस्थाभेदेन नामान्तरमाह । स चाप्रवृद्धस्तरुणो मदसंज्ञां बिभर्त्ति च । स उन्मादस्तरुणो नवीनः ॥ * ॥ उन्मादस्य विप्रकृष्टनिदानमाह ।
"विरुद्धदुष्टाशुचिभोजनानि
प्रधर्षणं देवगुरुद्विजानाम् ।
उन्मादहेतुर्भयहर्षपूर्व्वो
मनोऽभिघातो विषमाश्च चेष्टाः ॥"
दुष्टं धत्तूरबीजादिसहितम् । अशुचि रजस्वलादि-